**CLASS : 12th (Sr. Secondary)** **Code No. 2005**

**Series : SS-M/2017**

*रोल नं०* | | | | | | | | | | |

***SET : A***

# संस्कृत

## SANSKRIT

***ACADEMIC/OPEN***

(Only for Fresh Candidates)

***(Evening Session)***

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **14** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देशः —*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित-अवबोधनम्)**



Previous Pathshala

**1.** अधोलिखितगद्यांशं पठित्वा निम्नांकितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखेयुः –

आसीत् धारानगर्यां भोजो नाम राजा। सिंहासनम् अधिष्ठितः सः सुप्रबन्धं स्वराज्यं समृद्धमकरोत्। तस्य राज्ये विद्यार्थिनः विद्याभ्यासं, विद्वांसः च अध्यापनं कुर्वन्ति स्म। धनिनः विपत्तौ निर्धनानां साहाय्यं कुर्वन्ति स्म। भोजः एतादृशः गुणग्राही आसीत् यत् यः कोऽपि विद्वान् राजसदसि स्वकीयां कवितां, नवीनम् आविष्कारं वा प्रस्तौति स्म तस्मै भूयांसं पुरस्कारम् अयच्छत्।

***प्रश्नाः*** $5 \times 2 = 10$

(क) भोजो नाम राजा कुत्र आसीत् ?

(ख) धनिनः केषां सहायतां कुर्वन्ति स्म ?

(ग) भोजः किं समृद्धम् अकरोत् ?

(घ) भोजस्य राज्ये विद्याभ्यासं के कुर्वन्ति स्म ?

(ङ) भोजः कस्मै भूयांसं पुरस्कारम् अयच्छत् ?

**खण्डः 'ख'**

**(रचनात्मक–कार्यम्)**

**2.** विषयमेकमधिकृत्य लघुनिबन्धं संस्कृतभाषया रचयत – 6

(क) अनुशासनम्,

(ख) मम विद्यालयः,

(ग) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**खण्डः 'ग'**

**(पठित–अवबोधनम्)**

**3.** अधोलिखितगद्यांशस्य हिन्दीभाषाया सरलार्थं कार्यम् – 4



Previous Pathshala

(क) इदमेव च पुनः पुनरभिधीयसे – विद्वांसमपि, सचेतसमपि, महासत्त्वमपि, अभिजातमपि, धीरमपि, प्रयत्नवन्तमपि, पुरुषं दुर्विनीता खलीकरोति लक्ष्मीः।

**अथवा**

(ख) तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् - एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकममृततुल्यमुत्पद्यते। तृतीयरत्नाच्चतुरङ्गबलं भवति। चतुर्थाद्रत्नाद्दिव्याभरणानि जायन्ते।

**4.** अधोलिखितश्लोकस्य हिन्दीभाषाया सरलार्थं कार्यम् – 4

(क) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः।।

**अथवा**

(ख) विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

**5.** अधोलिखितासु सूक्तिषु मात्रद्वयोः सूक्त्योः भावार्थं हिन्दीभाषया लेख्यम् – 2 × 2 = 4

(क) सुलभसौख्यमिदं बालत्वं भवति।

(ख) दिदेश कौत्साय समस्तमेतत्।

(ग) मनुष्याणां हिंसावृत्तिस्तु निरवधिः।

(घ) विगुणः कार्षापणः, कुत्सितश्च पुत्रः संकटे कदाचिदुपयुक्तो भवेत्।

**6.** अधोलिखितं गद्यांशं पठित्वा अधस्तनानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लेखितव्यानि –

अस्माभिः पर्वताः शंकवः कृताः।

एतेषां सप्तद्वीपानां प्रत्येकमावेष्टनरूपाः सप्तसमुद्राः।



Previous Pathshala

*प्रश्नाः* 2 × 1 = 2

(क) सप्तसमुद्राः केषाम् आवेष्टनरूपाः सन्ति ?

(ख) 'अस्माभिः' इति पदे कः शब्दः का विभक्तिश्च ?

**7.** अधोलिखितं श्लोकं सम्पठ्य अधस्तनयोः प्रश्नयोः उत्तरे लेखनीये –

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्।।

*प्रश्नाः* 2 × 1 = 2

(क) जगत्सर्वं कीदृशम् अस्ति ?

(ख) 'सर्वम्' इति पदे कः शब्दः का विभक्तिश्च ?

**8.** रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत – 2 × 1 = 2

(क) शब्दैः प्रतीयते यद् गृहे चौरः अस्ति।

(ख) पशुहत्या तु तेषाम् आक्रीडनम्।

**खण्डः 'घ'**

**(संस्कृत-साहित्य–परिचयः)**

**9.** पं० हृषीकेशभट्टाचार्यस्य **अथवा** महाकवेः कालिदासस्य संक्षिप्तपरिचयः हिन्दीभाषया लेखितव्यः। 4

**10.** अधस्तनयोः पुस्तकयोः मध्ये ***एकस्य*** संक्षिप्तपरिचयः हिन्दीभाषया लेखनीयः – 4

(i) समुद्रसङ्गमः,

(ii) श्रीमद्भगवद्गीता।

**खण्डः 'ङ'**

**(छन्दोऽलङ्कार-परिचयः)**

**11.** अधोनिर्दिष्टछन्दस्सु मात्रद्वयोः संस्कृतभाषया लक्षणोदाहरणौ लिखत – 2 × 4 = 8

(i) अनुष्टुप्,

(ii) वंशस्थः,

(iii) मन्दाक्रान्ता।

**12.** अधः प्रदत्तेषु अलङ्कारेषु ***द्वयोरेव*** लक्षणोदाहरणौ संस्कृतभाषया लिखत – 2 × 4 = 8



**Previous Pathshala**

(i) अनुप्रासः,

(ii) उत्प्रेक्षा,

(iii) व्याजस्तुतिः।

## खण्डः 'च'

## (अनुप्रयुक्त-व्याकरणम्)

**13.** (क) स्वरसन्धेः **अथवा** विसर्गसन्धेः परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ख) कर्ताकारकस्य **अथवा** करणकारकस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

(ग) अव्ययीभावसमासस्य **अथवा** तत्पुरुष समासस्य परिभाषां सोदाहरणं हिन्दीभाषया लिखत। 2

## खण्डः 'छ'

## [ बहुविकल्पीय-वस्तुनिष्ठप्रश्नाः ]

**14.** अधस्तनप्रश्नानां लिखित्तोत्तर-विकल्पेषु *शुद्धविकल्पं* चित्वा उत्तरपुस्तिकायां लिखत – 16 × 1 = 16

(क) 'अन्यथेतः' इति पदे कः सन्धिविच्छेदः ?

(i) अन्य + थेतः (ii) अन्यथा + इतः

(iii) अन्यथ + इतः (iv) अन्यथा + एतः

(ख) 'तत् + श्रुत्वा' इति पदे किं सन्धिपदम् ?

(i) तद्श्रुत्वा (ii) तत्श्रुत्वा

(iii) तच्छ्रुत्वा (iv) तत्छ्रुत्वा

(ग) 'सर्वापि' इति पदे का सन्धिः ?

(i) दीर्घसन्धिः (ii) वृद्धिसन्धिः

(iii) गुणसन्धिः (iv) यण्सन्धिः

(घ) 'पुष्पाञ्जलिः' इति पदे विग्रहोऽस्ति –



Previous Pathshala

(i) पुष्पाणां अञ्जलिः (ii) पुष्पेषु अञ्जलिः

(iii) पुष्पेभ्यः अञ्जलिः (iv) पुष्पाय अञ्जलिः

(ङ) 'महान्धकारः' इति पदे कः समासः ?

(i) कर्मधारयः (ii) द्विगुः

(iii) तत्पुरुषः (iv) बहुव्रीहिः

(च) 'महान् उत्साहः' इति विग्रहे किं समस्तपदम् ?

(i) महानुत्साहः (ii) महोत्साहः

(iii) माहोत्साहः (iv) महानोत्साहः

(छ) 'किम्, पुल्लिंग, द्वितीया, द्विवचने रूपम्' –

(i) के (ii) काम्

(iii) कौ (iv) कान्

(ज) 'वनानि' इति पदे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया

(iii) चतुर्थी (iv) पंचमी

(झ) 'याचते' इति पदे कः धातुः ?

(i) यच्छ् (ii) यच्

(iii) यत् (iv) याच्

(ञ) 'परिश्रमसि' इति पदे कः पुरुषः ?

(i) प्रथमपुरुषः (ii) उत्तमपुरुषः

(iii) मध्यमपुरुषः (iv) अन्यपुरुषः

(ट) 'कृतवान्' इति पदे कः प्रत्ययः ?

(i) क्त (ii) तल्

(iii) क्त्वा (iv) क्तवतु

(ठ) 'उत् + स्था + क्तः' एषां संयोगे किं रूपम् ?

(i) उत्तिष्ठ (ii) उत्तिष्ठत

(iii) उत्थितः (iv) स्थितः

(ड) 'सह' इति उपपदयोगे का विभक्तिः ?

(i) प्रथमा (ii) तृतीया



Previous Pathshala

(iii) चतुर्थी (iv) पंचमी

(ढ) 'शरीरम्' इति पदस्य समानार्थकपदमस्ति –

(i) कलुषम् (ii) पातकम्

(iii) अङ्गम् (iv) गात्रम्

(ण) 'पूर्वतनम्' इति पदस्य विशेष्यम् –

(i) त्वम् (ii) पत्रम्

(iii) प्राप्तम् (iv) आशाम्

(त) 'विद्वान्' इति पदस्य विलोमपदस्ति –

(i) युवा (ii) वृद्धः

(iii) मूर्खः (iv) बालकः



Previous Pathshala